International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 96-99
© 2025 IJMH
www.themultijournal.com
Received: 28-11-2025
Accepted: 19-12-2025
Publish : 20-12-2025

**Dr. Haripada Bera**
Assistant Professor (Sub Editor)
IKS –EDS Centre of Central Sanskrit-University (CSU),At Deccan College-Post Graduate and Research Institute, (Deemed to be University),Yerawada, Pune, (Maharashtra)

**Correspondence:**
**Dr. Haripada Bera**
Assistant Professor (Sub Editor)
IKS –EDS Centre of Central Sanskrit-University (CSU),At Deccan College-Post Graduate and Research Institute, (Deemed to be University),Yerawada, Pune, (Maharashtra)

# समासशक्त्यर्थविवेचनम्

**Dr. Haripada Bera**

**निबन्धसारः**

कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयः सन्ति । परार्थाभिधानं वृत्तिः इति वृत्तेः लक्षणम्। अर्थात् प्रत्ययान्तर्भावेन अन्यपदार्थान्तर्भावेन वा यो विशिष्टः अर्थः सः परार्थः। परार्थः अभिधीयते येन इत्यर्थे करणे ल्युटि परार्थाभिधानम् इति शब्दस्य व्युत्पत्तिः। अत एव तिङन्तस्य वृत्तिरिति व्यवहारः न भवति। तत्रैकार्थीभावात्। लक्षणमिदं "समर्थः पदविधिः"[1] इति सूत्रे भाष्ये लक्ष्यते। परस्य शब्दस्य योऽर्थस्तस्याभिधानं शब्दान्तरेण यत्र सा वृत्तिरित्यर्थः। यथा– राजपुरुष इत्यत्र राजशब्देन वाक्या-वस्थायामनुक्तः पुरुषार्थोऽभिधीयते इति कैयटाचार्यः। नव्यास्तु एकशेषस्य वृत्तित्वं नाभ्यपगच्छन्ति। परार्थान्वितस्वर्थोपस्थापकत्वरूपवृत्तित्वस्य तत्राभावात्। परन्तु द्वन्द्वापवादतया एकशेषस्यापि वृत्तित्वमुचितमिति अन्ये वदन्ति। अनया रीत्या समासोऽपि वृत्तिषु अन्यतमः इति। प्रसङ्गेऽस्मिन् नैयायिकमीमांसकादीनां शाब्दिकैः मतभेद दृश्यते। एवञ्च निबन्धेऽस्मिन् वृत्तिस्वरूपम्, अस्याः जहत्स्वार्थऽजहत्स्वार्थभेदेन द्वैविध्यम्, समासे विशिष्टाशक्तिः, इत्येतत्सर्वं विवेच्यते।

**कुटशब्दाः**

समासः, शक्तिः, वृत्तिः, परार्थाभिधानम्, राजपुरुषः, वैयाकरणः, नैयायिकः, मीमांसकः, जहत्स्वार्था, अजहत्स्वार्था, लक्षणा, समुदायः, नियमः, विधि इत्येते शब्दाः मुख्याः निबन्धेऽस्मिन्।

**प्रस्तावना**

कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः इति प्रसिद्धिः। अस्मात् समासः एका वृत्तिः। समासादि पञ्चसु वृत्तिषु विशिष्टे एव शक्तिः विद्यते । अवयवे शक्तिः नास्ति, अवयवार्थानुभवाभावात्। वृत्तिः इति पदस्य परार्थाभिधानम् इत्यर्थः। अत्र परस्य नाम अन्यस्य इत्येकः विशिष्यस्येत्यनः अर्थः। इत्थं व्युत्पत्तिभेदमाश्रित्य जहत्स्वार्थाऽजहत्स्वार्थाभेदेन वृत्तिः द्विधा । जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था कथ्यते। अस्याः लक्षणं भवति "अवयवार्थनिरपेक्षत्वे सति समुदायार्थबोधिकात्वं जहत्स्वार्थात्वम्"[2] इति। अर्थात् यत्र वृत्तौ अवयवार्थस्य न काऽपि अपेक्षा। केवलं समुदायार्थस्यैव सा जहत्स्वार्था वृत्तिः। रथन्तथरं सामभेदः, शुश्रुषा सेवा इत्यादीनि जहत्स्वार्थाया उदाहरणानि। अनयोरवयवार्थस्य किञ्चिदपि न मानम्, किन्तु समुदायार्थस्यापि। एवञ्च न जहति पदानि स्वार्थं यस्यामिति अजहत्स्वार्था। अस्याः लक्षणं भवति- "अवयवार्थसम्बलितसमुदायार्थबोधिकात्वम् अजहत्स्वार्थत्वम् ।"[3] अर्थात् यस्यां वृत्तौ अवयवार्थेन साकं समुदायार्थस्य बोधः सा किल अजहत्स्वार्था वृत्तिः। अजहत्त्वार्थायाः उदाहरणम् - राजपुरुष इत्यादि । अत्र राज्ञः पुरुष इत्यादिविग्रहे अवयवार्थस्यापि भानम् समुदायार्थस्यापि। रथन्तरं समेत्यादौ अवयवार्थस्य अनुभवाभावेन पञ्चसु वृत्तिषु विशिष्ट एवं शक्तिर्मन्तव्या नैवावयवे इति वैयाकरणानां मतम् । परन्तु नैयायिकमीमांसकादिभिः समासे विशिष्टा शक्ति : नाङ्गीक्रियते । अधुना सर्वेषां मतानि विवेच्यन्ते ।

**अत्र नैयायिकाः-**

राजपुरुष इत्यत्र राजपदेन राजत्वावच्छिन्नस्य,पुरुषपदेन पुरुषत्वावच्छिन्नस्योपस्थितिर्भवतीति नैयायिकाः। तदनन्तरमाकांक्षा योग्यता-तात्पर्यैः राजविशेषणकपुरुषविशेष्यकसम्बन्धज्ञानं भवति । अथवा लक्षणया योऽर्थो ज्ञातुं शक्यते तत्र लक्षणैव आवश्यकी, न तु शक्तिः । अतएव तिङां कृतो शक्तिः, रथो गच्छतीत्यादौ आश्रयादौ लक्षणा । एवञ्च राजपुरुष इत्यत्र क्लृप्तशक्तिकात् राजादिपदात् क्वचित् लक्षणां विना, क्वचित् लक्षणया अर्थप्रतीतिर्भवति। यथा राजपुरुषः इति लौकिकविग्रहे राजपुरुषःइति कर्मधारयसमासे लक्षणां विना अभेदान्वयो भवति । राज्ञः पुरुषः इति विग्रहे राजपुरुषः इति

षष्ठीतत्पुरुषसमासे पूर्वपदस्य राज इत्यस्य सम्बन्धिलक्षणया राजसम्बन्धाभिन्नः पुरुष इति शाब्दबोधो भवति। चित्रगुरित्यादिबहुव्रीहिसमासे उत्तरपदस्य चित्रगवीस्वाम्यादौ लक्षणा, पूर्वपदन्तु तात्पर्यग्राहकम् ।

**अत्र मीमांसकाः-**

भाट्टमते समासे विशिष्टा शक्तिः नास्ति। अथवा लक्षणाऽपि नाश्रयणीया। किन्तु समासोपस्थितविग्रहवाक्यादेव बोधः श्लोकादान्वयवाक्यादिवत् ।

**अत्र वैयाकरणाः:-**

वैयाकरणानां मते समासे एका विशिष्टा शक्तिः वर्त्तते। अवयववर्त्तिन्या शक्त्या लक्षणया वा कार्यनिर्वाहो न स्यादिति मत्वा सर्वस्मिन् सामसे शक्तिमभ्युपयन्ति वैयाकरणाः। एतेषां मते राजपुरुषः इत्यत्र राजविशिष्टपुरुष इत्यादौ समुदायार्थशक्तिः अवयवार्थशक्तेः भिन्ना । यथा पङ्कजादिशब्दे अवयवशक्तितो भिन्नैव पद्मत्वावच्छिन्ननिरूपिता समुदाये शक्तिः । तदुक्तम् कौण्डभट्टेन -

**समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।**
**बहूनां वृत्तिधर्माणां तस्मादेकार्थीभाव आश्रितः।।**[4]

पङ्कजशब्दवत् समासे खलु भिन्नैव विशिष्टैव शक्तिः स्वीकर्तव्या। बहूनां वृत्तिधर्माणां वचनैरेव "सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो न" इत्याद्यपूर्वैः वचनैरेव साधने महद् गौरवं स्यात्। तस्माद्धेतोः एकार्थीभाव आश्रितः। शक्तिः द्विधा व्यपेक्षारूपा, एकार्थीभाव रूपा च। तत्र स्वार्थपर्यवसायिनां शब्दानामाकाङ्क्षावशाद् यः परस्परं सम्बन्धः सा व्यपेक्षा, सा च वाक्ये एव। समासादिवृत्तौ तु एकार्थीभावरूपं सामर्थ्यम्। तदेव "समर्थः पदविधिः"[5] सूत्रे समर्थपदेन गृह्यते । तदुक्तं भाष्ये किं समर्थ नाम। पृथगर्थानामेकार्थीभावः समर्थवचनम्। पृथगर्थानां पदानामेकार्थीभावः समर्थमित्युच्यते।[6] क्व पुनः पृथगर्थानि, क्वैकार्थानि। वाक्ये पृथगर्थानि राज्ञः पुरुष इति। समासे पुनरेकार्थानि राज्पुरुष इति। तस्मात् समासे एकार्थभाव आश्रितः।

**इदमत्र विवेचनम्:-**

प्रत्येकपदवृत्त्या पदार्थोपस्थितौआकांक्षादिवशात् यथा विशिष्टार्थबोधो भवति तथैव पङ्कजपदादपि पङ्कजनिकर्तुरपि योगादेव विशिष्टार्थोपस्थितौ समुदाये शक्तिं न स्वीकुर्वन्ति व्यपेक्षावादिनो नैयायिकाः। परन्तु मतमिदं समीचीनं न प्रतिभाति । यतो हि पद्मत्वेन रूपेण पद्मार्थस्य सा शक्तिः समासे कल्पिता । एवञ्च चित्रग्वादिपदेऽपि स्वामित्वेनोपस्थितये समुदायशक्तिकल्पनस्यावश्यकता विद्यते ।

नैयायिकानां मते चित्रगुरित्यत्र स्वामित्वेनोपस्थितये लक्षणा स्वीकर्त्तव्या । वस्तुतः अत्र लक्षणा स्वीकर्तुं न शक्यते। चित्रपदे गोपदे वा लक्षणेत्यत्र विनिगमनविरहात्। यत्र तात्पर्यानुपपत्तिः भवति तत्र लक्षणा नाश्रीयते। यदि चित्रगुरित्यत्र चित्रपदस्य चित्रस्वामिनि लक्षणाऽश्रीयते, तदा चित्रस्वामिनि गौरित्यनिष्टबोधः स्यात् । यदि अनेन तात्पर्यानुपपत्तिपरिहारो न भवति, तर्हि उत्तरपदे लक्षणा आश्रयणीया इत्यपि न। उत्तरपदे लक्षणास्वीकारेऽपि विवक्षितार्थलाभात् गोपदस्य गोस्वामिनि लक्षणायां गोः पदार्थैकदेशतया तत्र चित्रपदार्थान्वयायोगात् चित्रस्वामीति बोधो न स्यात् ।

यद्यत्र लक्षणया स्वामित्वार्थोपस्थितिः स्यात् तर्हि पङ्कजपदेऽपि पद्मत्वेन रूपेणोपस्थितये लक्षणा स्वीकरणीया। एवञ्च रथकारपदेऽपि। अयं भावः मीमांसकैः आशंकितो यत् "वर्षासु रथकारोऽग्निमादधीत" इत्यत्र "स्त्रीशूद्रौ नाधीयेताम्" इति सिद्धान्तेन शूद्रे वेदाध्ययनाभावात् वैदिककर्मण्यभावात् वर्षासु अग्न्याधानविशेषरूपा रथोत्पादको द्विजो ग्राह्य इत्याशङ्कय "योगाद् रूढिः वलीयसी" इति न्यायेन समुदायशक्त्या शूद्रस्य शीघ्रोपस्थितिकतया ग्रहणम् । अतः अग्न्याधानविधायक श्रुत्या तदुपयोगिमन्त्रेषु अधिकारकल्पनमिति निर्णीतम् ।

नैयायिकानां मते तु समुदायशक्तेरभावात् लक्षणयैव शूद्रस्याधिकारत्वं प्रकल्प्य विधानसामर्थ्याद् अपूर्वविधानकल्पनमयुक्तम्। समुदायशक्तिवादिनये तु रुढिशक्त्या शूद्रस्यैवोपस्थित्या गतिरभावात् मीमांसकानाम् अपूर्वविद्याकल्पनं युक्तम्। यदि राजपुरुषादिपदादवयवशक्त्या राजादिविशिष्टपुरुषादिबोधो जायते, तर्हि किमर्थमतिरिक्तशक्तिस्वीकार इति चेत् राजपुरुषादवयवशक्तिद्वयकल्पनापेक्षया समुदाये शक्तिस्वीकारे लाघवं भवति। एवञ्च राजपुरुषः इत्यत्र राजपदनिष्ठशक्त्या पुरुषपदनिष्ठशक्त्या च राजपुरुषयोः उपस्थितिसत्त्वेऽपि तयोः स्वस्वामिभावसम्बन्धेन अन्वयो न स्यात्। नामार्थयोरभेदान्वय एवेति व्युत्पत्तिविरोधात्, अन्यथा राजपुरुष इत्यत्रापि भेदसम्बन्धेनान्वयापत्तेः। अत एव समुदायशक्तिरावश्यकी।

समुदाये अतिरिक्तशक्तिस्वीकाराभावे "ऋद्धस्य राज्ञः पुरुष" इति वत् ऋद्धस्य राजपुरुष इत्यत्रापि विशेषणाद्यन्वयः स्यात् । एवञ्च कुक्कुटाण्डम् इत्यत्र स्त्रीत्वं न प्रतीयते । राज्ञो राज्ञां वा पुरुष इति वत् राजपुरुष इत्यत्र संख्या न शब्दबोधविषयी भवति ।

एवं विशिष्टशक्तिस्वीकारे विभाषावचनं समासनियमवारणाय न कर्त्तव्यम् । नैयायिकानां मते समासनियमवारणाय विषाणाधिकारः करणीयः भवतीति गौरवम्। विभाषाधिकाराभावे व्यपेक्षापक्षे व्यपेक्षायामेव समासस्य विधानेन वृद्धिसंज्ञाभावात् समाससंज्ञायाः नित्यत्वं स्यात् । तथा च वाक्यस्य निवृत्तिरेव स्यात् । तद् वारणाय सूत्रं करणीयम् । एवञ्च धवखदिरौ, निष्कौशाम्बिः, गोरथः, घृतधरः, गुडधानाः, केशचूडः, सुवर्णालङ्कारः, द्विदशाः, सप्तपर्णा इत्यादावितरयोग-निष्क्रान्त-युक्त पूर्ण-मिश्र-संघात-विकार-सुच्प्रत्य-यलोपवीप्साद्यर्थप्रतिपादने एतेषां पदानां प्रयोगः स्यादिति अतिगौरवं भवेत् ।

अस्माकं वैयाकरणानां मते तु साहित्याद्यवच्छिन्ने एव शक्तिस्वीकारेण "उक्तार्थानामप्रयोग" इति न्यायात् क्रान्तादीनां प्रयोगो न कर्त्तव्यो भवति । यदि समुदाये शक्तिः नाङ्गीक्रियते, तर्हि तत्र वृत्तिमत्वरूपार्थवत्वाभावेन समासे अर्थवच्छब्दस्वरूपं विना प्राति-

पदिकसंज्ञा न स्यात्। अस्यायमभिप्रायो यत् -"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[7] इति सूत्रे अर्थवत्पदं वर्तते। अनेन "वृत्तद्धित-समासाश्च" इति सूत्रे तस्यानुवृत्तिः स्यात्। यदि वृत्तिरूपमर्थ-वत्वमाश्रीयते, तदा तदनुवर्तनं व्यर्थं स्यात्, कृदादीनामनर्थका-नामप्रसिद्धेः। एतदर्थम् एकार्थीभावरूपवृत्तिमत्त्वमर्थवत्वमिति स्वीकरणीयम् ।

ननु "कृत्तद्धितसमासाश्च"[8] इति सूत्रे समासग्रहणात् प्रातिपदिकसंज्ञा स्यादिति चेन्न, तस्य नियमार्थतया भाष्यकृता प्रतिपादितत्वात्। "सिद्धे सति आरभ्यमाणो विधिः नियमाय कल्प्यते" इति न्यायात् नियमार्थत्वमपि अर्थवत्वे सत्येव सम्भवति।

यदि लक्षणा स्वीकरिष्यत इत्युच्यते तदपि न सङ्गच्छते । यतो हि समासे शक्तिं विना शक्यार्थो नास्ति, शक्यार्थं विना तत्सम्वन्धरूपा लक्षणाऽपि न स्यात्। स्वज्ञाप्यसम्बन्धलक्षणाऽपि वक्तुं न शक्यते, अपभ्रंशे लक्षणा प्रसङ्गात्। अतएव समासस्य प्रातिप-दिकसंज्ञासिद्धये समुदाये एकार्थीभावात्मिका शक्तिः स्वीकरणीया एव ।

**जहत्स्वार्थत्वाजहत्स्वार्थत्वविषये कौण्डभट्टस्य मतम् -**

भूषणसारकारः कौण्डभट्टो हि जहत्स्वार्थाऽजहत्स्वार्थभेदेन प्रथमतो वृत्ते द्वैविध्यमं प्रदर्शितवान्, अनन्तरञ्च जहत्स्वार्थाऽ-जहत्स्वार्थयोः द्वयोरपि भेद-संसर्ग-भेदसंसर्गोभयेति प्रकारभेदेन त्रैविध्यं प्रदर्शितवान्।[9] वृत्तेः दर्शिताऽजहत्स्वार्थता पराभिमतव्य-पेक्षापक्षमाश्रित्यैवेति ।

भेद-संसर्ग-भेदसंसर्गोभयेति वाच्यत्रैविध्येन वृत्तेस्त्रैविध्योपादन-मप्येकार्थीभावस्थलीयजहत्स्वार्थत्वाभिप्रायेणैव। अत्र भेदपक्षे राज-पुरुष इत्यादितो राजकीयभिन्नः पुरुष इत्येवं भेदविषयको बोधः। पुरुषे राजसम्बन्धस्यानुमेयतैव, न तु शाब्दज्ञानविषयता । एतदर्थमेव "राजपुरुषः सुन्दरः" इति वद् राजपुरुषो देवदत्तस्येत्येवं प्रयोगः न भवति । द्वितीयपक्षे तु "राजसम्बन्धात् पुरुष" इत्यादिसम्बन्धरूपमेव तत्र शाब्दं ज्ञानम्। अराजकीयभेदस्तु तत्रोत्तरकालमनुमेय एव, विनिगमनाविरहात्। उभयोर्भेदसंसर्गयोस्तत्र वाच्यत्वस्वीकारे तु "अराजकीयभिन्नो राजसम्बन्धवांश्च पुरुष" इत्येवं भेदसंसर्गोभय-विषयकं शाब्दमेव ज्ञानम् ।

**समासभेदाः**

श्रीमता कौण्डभट्टेन "सुपां सुपा"[10] इत्यादिकारिकया समासस्य-षड्विधत्वं प्रदर्शितम् । तत्र क्रमेणोदाहरणानि –

**सुपां सुपा** – राजपुरुष" इत्यादिः सुबन्तपदद्वयकसमासः प्रथमः। अत्र सुप् इत्यनेन तदन्तविधिना सुबन्तपदमेव गृह्यते। तेन सुबन्तस्य सुबन्तेन सह समासो भवतीति सिद्ध्यति।

**सुपां तिङा** – सुबन्तपूर्वपदकतिङन्तोत्तरपदकश्च "पर्यभूषयत्", "अनुव्यचलत्" इत्यादिः द्वितीयः। सुबन्तेन सह तिङन्तस्य समासो भवत्यत्र । पूर्वोक्तोदाहरणद्वये परि, अनु इति पदद्वयेन यथाक्रमम् अभूषयत् व्यचलत्(वि+अचलत्) इति तिङन्तपदद्वयस्य समासो भवति। अनु परि, वि, इत्येतत् त्रयमेव गतिसंज्ञकं भवति। अतः "गतिमतोदात्तवता तिङापि समासः" इति वार्तिकेन अत्र समासो जायते।

**सुपां नाम्ना** – सुबन्तपूर्वपदकप्रातिपदिकोत्तरपदकः "कुम्भकार" इत्यादिः तृतीयः । अत्र सुबन्तस्य नाम्ना अर्थात् प्रातिपदिकेन सह समासः जायते। साधारणतया पदयोः पदानां वा मध्ये एव समासो परिलक्ष्यते सर्वत्र। किन्तु क्वचित् सुबन्तेन केवलं नामपदस्य समासो भवति। तद्यथा– कुम्भकारः। अत्र कुम्भ ङस् कार इत्यवस्थायामेव उपपदमतिङ् इत्यनेन समासो भवति। अयं तावदुपपदसमासः इति कथ्यते। अत्र "गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः" इति परिभाषा ज्ञापकं भवति।

**अत्र कश्चित् विशेषः –**

केवलं उत्तरपदे एव सुबुत्पत्तेः प्राक् समासो भवति। अन्यथा चर्मक्रीती इत्यादौ पूर्वपदस्य चर्मन् इत्यस्य प्रातिपदिकत्वे नलोपापत्तिः स्यात्।

**सुपां धातुना** – सुबन्तपूर्वपदकधातूत्तरपदकश्च "कटप्रूः" इत्यादिः चतुर्थः । सुबन्तस्य धातुना समासः।अत्र पूर्वपदं सुबन्तम् उत्तरपदं च केवलं धातुः, न तु सुप्तिङन्तम्। कटं प्रवते इति कटप्रूः। कट इति सुबन्तं गत्यर्थकः प्रुङ् इति धातुः। प्रुङ् इत्यस्मात् क्विप् इति भवति। क्विपः सर्वापहारित्वाल्लोपेन धातुमात्रमुत्तरपदमिति भावः। अत्र अन्येभ्योऽपि दृश्यते इति सूत्रस्थेन "क्विब्बचिप्रच्छ्यायतस्तूकटप्रू-जुश्रीणां दीर्घश्च" इति वार्तिकबलात् निपातनात् समासः।

**तिङां तिङा** – तिङन्तपूर्वपदकतिङन्तोत्तरपदकः "पिबतखादता" "पचतभृज्जते" त्यादिः पञ्चमः। तिङन्तस्य तिङन्तेन सह समासः। अर्थात् अत्र पदद्वयमेव तिङन्तं भवति। सततं यस्यां क्रियायाम-भिधीयते सा पिवतखादत इत्यर्थः। "आख्यातमाख्यातेन क्रियासातत्ये" इति मयूरव्यंसकाद्यन्तर्गतगणसूत्रात् समासः सिद्ध्यति।

**तिङां सुपा** – तिङन्तपूर्वपदकसुबन्तोत्तरपदको "जहिस्तम्बः" इत्यादिः षष्ठः । अत्र तावत्तिङन्तस्य सुबन्तेन सह समासः दृश्यते। एवञ्च पूर्वपदं तिङन्तम् उत्तरपदं च सुबन्तमिति बोध्यम्। अत्र "जहि" इति तिङन्तस्य "स्तम्ब" इति सुबन्तेन सह समासः। स्तम्बं जहि इति आभीक्ष्ण्येन य आह स जहिस्तम्ब इति। स्तम्बीघातकर्ता इति समासार्थः। अत्र "जहि कर्मणा बहुलमाभीक्ष्णे कर्तारं चाभिदधाति" इति मयूरव्यंशकाद्यन्तर्गतगणसूत्रात् समासः।

अयं षड्विधोऽपि समासः "सह सुपा"[11] इत्यत्र योगविभागेन भाष्ये व्युत्पादितः। एवमेव शब्दकौस्तुभादावपि वर्णितश्चेति।

केचन वैयाकरणा अव्ययीभाव-तत्पुरुष-बहुव्रीहि-द्वन्द्वभेदेन समासस्य चातुर्विध्यं प्रतिपादयन्ति। परन्तु एतन्मते "भूतपूर्वः, दृन्भूः, कारभूः, आयतस्तूः, कटप्रुः, वागर्थाविव इत्यादीषु उदाहरणेषु तत्तत्वार्त्तिकविहितसमासानां अन्तर्भावो"[12] न भवति ।

नागेशाचार्यैस्तु विशेषसंज्ञारहित-विशेषसंज्ञायुतभेदेन पूर्वं समास-स्य द्वैविध्यं प्रतिपाद्य विशेषसंज्ञायुतस्य चाव्ययीभावादिभेदेन चतुर्विधत्वं प्रतिपादयता मिलित्वा समासस्य पञ्चविधत्वमेव प्रतिपादितम्।

**सन्दर्भग्रन्थाः**


१.अष्टाध्यायी, भगवान् पाणिनिः, चौ. सं. सि. आ. वाराणसी - १९५९।

२.परमलघुमञ्जूषा, आचार्यः नागेशभट्टः, संस्कृतमहाविद्यालयः, वडौदा – १९६१।

३.प्रौढमनोरमा, श्रीमन् भट्टोजिदीक्षितः, चौ.सु. भा. प्रकाशनम्, वाराणसी - १९३४।

४.महाभाष्यम्, भगवान् पतञ्जलिः,चौ. सं. प्रतिष्ठानम्, दिल्ली-१९८८।

५.लघुशब्देन्दुशेखरः, आचार्यः नागेशभट्ट :, चौखम्बा, वाराणसी १९८७।

६.वाक्यपदीयम्, भत्तृहरिः, कृष्णदास अकादमी, वाराणसी – १९८७।

७.वैयाकरणभूषणसारः, कौण्डभट्ट :, चौखम्बा विद्याभवनम्, वाराणसी (प्रभादर्पणटीकासहितः)।

८.वैयाकरणसिद्धान्तलघुमञ्जूषा, चौ. सं. सि. आ., वाराणसी (रत्न-प्रभाटीका)


**संदर्भ**

1. अ.सू. – २/१/१

2. प.ल.म.(समासादिवृत्त्यर्थनिरूपणप्रकरणम्)

3. प.ल.म. (समासादिवृत्त्यर्थनिरूपणप्रकरणम्)

4. वै.भू.सा.का. ३१-३२

5. अ.सू. - २/१/१

6. म. भा. - २/१/१/

7. अ.सू. - १/२/४५

8. अ.सू. - १/२/४६

9. जहत्स्वार्थाऽजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा । भेदः संसर्ग उभयञ्श्चेति वाच्यव्यवस्थितेः ।। - भू.सा.का. - ३०

10. सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा । सुबेन्तेनेति विज्ञेयः समासः षड्विधो बुधैः ।। - वै.भु.स.का. - २८

11. अ.सू. - ५/३/१०६

12. इवेन सह समासो विभक्त्यलोपश्च इत्यादीनि।